अचलं नाम वज्राख्यं विहितं वज्रपाणिना ॥” ब्राह्मणः । यथा, महाभारते । १ । १७१ । ५१ ।
“वज्रपाणिर्ब्राह्मणः स्यात् क्षत्त्रं वज्ररथं स्मृतम् ।
वैश्या वै दानवज्राश्च कर्म्मवज्रा यवीयसः ॥”)

वज्रपुष्पं, क्ली, ( वज्रमिव पुष्पम् । ) तिलपुष्पम् । इत्यमरः । २ । ४ । ७६ ॥

वज्रपुष्पा, स्त्री, (वज्रमिव पुष्पं यस्याः ।) शतपुष्पा । इति राजनिर्घण्टः ॥

वज्रबीजकः, पुं, ( वज्रमिव कठिनं बीजमस्य । कप् । ) लताकरञ्जः । इति राजनिर्घण्टः ॥

वज्रमूली, स्त्री, ( वज्रमिव कठिनं मूलं यस्याः । ङीष् । ) माषपर्णी । इति राजनिर्घण्टः ॥ ( विवरणमस्या माषपर्णीशब्दे ज्ञातव्यम् ॥ )

वज्ररथः, पुं, (वज्रमिव रथो यस्य ।) क्षत्त्रियः । इति पुराणम् ॥ ( यथा, महाभारते ।१।१७१।५१।
“वज्रपाणिर्ब्राह्मणः स्यात् क्षत्त्रं वज्ररथं स्मृतम् ॥”)

वज्ररदः, पुं, ( वज्रमिव रदोऽस्य । ) शूकरः । इति त्रिकाण्डशेषः ॥ वज्रतुल्यदन्तस्य ॥

वज्रवल्ली, स्त्री, ( वज्रमिव कठिना वल्ली ।) अस्थिसंहारलता । इति हारावली ॥

वज्रवाराही, स्त्री, मायादेवी । तत्पर्य्यायः । मारीची २ त्रिमुखा ३ वज्रकालिका ४ विकटा ५ गौरी ६ पोत्रिरथा ७ । इति त्रिकाण्डशेषः ॥

वज्रवृक्षः, पुं, ( वज्रनिवारको वृक्षः । ) सेहुण्डवृक्षः । इति राजनिर्घण्टः ॥ ( तथास्यान्यः पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
“स्नुही स्नुक् च महावृक्षो वज्रवृक्षः सुधागुड़ा ॥”)

वज्रशल्यः, पुं, ( वज्रमिव कठिनं शल्यं गात्रलोमशलाका यस्य । ) शल्यकनामा जन्तुः । इति राजनिर्घण्टः ॥

वज्रशृङ्खला, स्त्री, ( वज्रवत् शृङ्खलं यस्याः । ) विद्यादेवी । इति हेमचन्द्रः । २ । १५३ ॥

वज्रसूर्य्यः, पुं, ( अतिसारवत्त्वात् वज्रमिव तेजस्वित्वात् सूर्य्य इव च । ) बुद्धविशेषः : इति त्रिकाण्डशेषः ॥

वज्रा, स्त्री, ( वजति गच्छतीति । वज गतौ + “ऋजेन्द्रेति ।” उणा० २ । २८ । इति रक् । टाप् । ) स्नुहीवृक्षः । गुडूची । इति मेदिनी । रे, ८१ ॥ दुर्गा । यथा,—
“वज्राङ्कुशकरी देवी वज्रा तेनोपगीयते ॥”
इति देवीपुराणे ४५ अध्यायः ॥

वज्राङ्गः, पुं, ( वज्रमिव अङ्गं यस्य । ) सर्पः । इति राजनिर्घण्टः ॥ वक्राङ्ग इति वा पाठः । वज्रतुल्याङ्गयुक्ते, त्रि ॥

वज्राङ्गी, स्त्री, ( वज्रमिव अङ्गं यस्याः । ङीष् । ) गवेधुका । इति शब्दचन्द्रिका ॥ अस्थिसंहारी । इति भावप्रकाशः ॥

वज्राभः, पुं, ( वज्रस्य हीरकस्य आभा इव आभा यस्य । ) दुग्धपाषाणः । इति राजनिर्घण्टः ॥ हीरकतुल्यदीप्तिमति, त्रि ॥

वज्राशनिः, पुं, वज्रम् । इति त्रिकाण्डशेषः ॥

वज्रास्थिशृङ्खला, स्त्री, कोकिलाक्षवृक्षः । इति राजनिर्घण्टः ॥

वज्री, [ न् ] पुं, ( वज्रोऽस्यास्तीति । वज्र + “अत इनिठनौ ।” ५ । २ । ११५ । इति इनिः । ) इन्द्रः । इत्यमरः । १ । १ । ४५ ॥ ( यथा, रघुः । ६ । २४ ।
“यमकुबेरजलेश्वरवज्रिणां
समधुरं मधुरञ्चितविक्रमम् ॥” )
घुक्कः । इति मेदिनी । ने, १२६ ॥ ( वज्रविशिष्टे, त्रि । यथा, महाभारते । १३ । १४ । ३८१ ।
“पिनाकिनं वज्रिणं तीक्ष्णदंष्ट्रं
शुभाङ्गदं व्यालयज्ञोपवीतम् ॥ )

वज्री, स्त्री, ( वज् + रक् । गौरादित्वात् ङीष् । ) स्नुहीभेदः । इति मेदिनी । रे, ८१ ॥ (तथास्याः पर्य्यायः ।
“सेहुण्डः सिंहतुण्डः स्याद्वज्री वज्रद्रुमोऽपि च ।
सुधासमन्तदुग्धा च स्नुक् स्त्रियां स्यात् स्नुहीगुड़ा ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

वञ्चकः, पुं, ( वञ्चयते प्रतारयतीति । वञ्च + णिच् + ण्वुल् । ) शृगालः । इत्यमरः ॥ गृहबभ्रुः । इति मेदिनी । के, १५४ ॥

वञ्चकः, त्रि, ( वञ्चयते इति । वञ्च + णिच् + ण्वुल् । ) खलः । धूर्त्तः । इति मेदिनी । के, १५४ ॥ ( यथा, कलाविलासे । १ । ३६ ।
“शृणु पुत्त्र वञ्चकानां सकलकलाहृदयसारमतिकुटिलम् ।
ज्ञाते भवन्ति यस्मिन् क्षणरुचिचपलाः श्रियोऽप्यचलाः ॥” )

वञ्चथः, पुं, ( वञ्चति प्रतारयतीति । वञ्च + “शीङ्शपीति ।” उणा० ३ । ११३ । इति अथः । ) धूर्त्तः । इत्युणादिकोषः ॥ वञ्चना । कोकिलः । इति संक्षिप्तसारोणादिवृत्तिः ॥

वञ्चनं क्ली, ( वञ्च + भावे ल्युट् । ) प्रतारणम् । इति हेमचन्द्रः । ३ । ४३ ॥ तस्य गोपनीयत्वम् । यथा,—
“वञ्चनञ्चापमानञ्च मतिमान्न प्रकाशयेत् ॥”
इति चाणक्यसंग्रहः ॥

वञ्चना, स्त्री, ( वञ्च् + णिच् + युच् + टाप् । ) प्रतारणा । यथा,—
“ते कान्तं मुनयो दिशाः प्रेक्ष्य हैमवतं पुरम् ।
स्वर्गाभिसन्धि सुकृतं वञ्चनामिव मेनिरे ॥”
इति कुमारसम्भवे । ६ । ४७ ॥

वञ्चितः, त्रि, ( वञ्च्यते स्मेति । वञ्च + णिच् + क्तः । ) वञ्चनाविशिष्टः । प्रतारितः । तत्पर्य्यायः । विप्रलब्धः २ । इति हेमचन्द्रः । ३ । १०६ ॥ ( यथा, कुमारे । ४ । १० ।
“विधिना जन एष वञ्चित-
स्त्वदधीनं खलु देहिनां सुखम् ॥” )

वञ्चुकः, त्रि, ( वञ्चति प्रतारयतीति । वञ्च – उकञ् ।) प्रतारणशीलः । तत्पर्य्यायः । धूर्त्तः २ वञ्चूकः ३ । इति शब्दरत्नावली ॥

वञ्च्यं, त्रि, (वञ्च् + ण्यत् । “वञ्चेर्गतौ ।” ७ । ३ । ६३ । इति कुत्वं न ।) गमनीयम् । इति गत्यथवञ्चधातोः कर्म्मणि घ्यण्प्रत्ययेन निष्पन्नम् । इति मुग्धबोधव्याकरणम् ॥

वञ्जुलः, पुं, ( वजतीति । वज गतौ + बाहुलकात् । उलच् नुमुच । ) तिनिशवृक्षः । ( तथास्य पर्य्यायः ।
“तिनिशः स्यन्दनो नेमी रथद्रुर्वञ्जुलस्तथा ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )
अशोकवृक्षः । इत्यमरः । २ । ४ । ७७ ॥ स्थलपद्मवृक्षः । इति शब्दरत्नावली ॥ पक्षिविशेषः । इति हलायुधः ॥ वेतसवृक्षः । इति मेदिनी । ले, १२८ ॥ (अस्य पर्य्यायो यथा,—
“वेतसो नम्रकः प्रोक्तो वानीरो वञ्जुलस्तथा ।
अभ्रपुष्पश्च विदुलो रथ शीतश्च कीर्त्तितः ॥”
इति भावप्रकाशः ॥
यथा च रामायणे । ६ । ४ । ७८ ।
“चिरविल्वा मधूकाश्च वञ्जुला वकुलास्तथा ॥”)

वञ्जुलद्रुमः, पुं, ( वञ्जुलो द्रुमः । ) अशोकवृक्षः । इति राजनिर्घण्टः ॥ ( वेतसवृक्षादिरपि तदर्थे वञ्जुलशब्ददर्शनात् ॥ )

वञ्जुलप्रियः, पुं, ( वञ्जुलस्य प्रियः । वञ्जुलः प्रियश्चेति कर्म्मधारयो वा । ) वेतसवृक्षः । यथा.
“विदुलो वेतसः शीतो वानीरो वञ्जुलप्रियः ॥”
इति रत्नमाला ॥

वञ्जुला, स्त्री, ( वञ्जुल + टाप् । ) बहुदुग्धा गौः । इति हेमचन्द्रः । ४ । ३३५ ॥ ( नदीविशेषः । यथा, मात्स्ये । ११३ । २८ ।
“गोदावरी भीमरथी कृष्णवेणी च वञ्जुला ।
तुङ्गभद्रा सुप्रयोगा वाह्या कावेरी चैव तु ।
दक्षिणापथनद्यस्ताः सह्यपादाद्विनिःसृताः ॥”)

वट, वेष्टे । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) वटति वृक्षं लता । इति दुर्गादासः ॥

वट, इ स्तेये । सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । इदित् ।) इ, वण्टकः । इति दुर्गादासः ॥

वट, इ कि वण्टने । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् । ) वण्टनं विभागः । इ, वण्ट्यते । कि, वण्टयति वण्टति ।
वण्टन्ति हाटकं यस्मात् प्राप्य विप्राः परस्परम् ।
इति हलायुधः । अयं चुरादौ केश्चिन्न पठ्यते । इति दुर्गसिंहादयः । इति दुर्गादासः ॥

वट, त् क वेष्टे । भागे । इति कविकल्पद्रुमः ॥ ( अदन्तचुरा०-पर०-सक०-सेट् । ) वटयति । इति दुर्गादासः ॥

वट, म उक्तौ । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) म, वटयति । इति दुर्गादासः ॥